# Shri Krishna PrAtahsmarana Stotram

# શ્રીકૃષ્ણપ્રાતઃસ્મરણસ્તોત્રમ્

## Document Information

Text title : kRRiShNaprAtaHsmaraNastotram

File name : kRRiShNaprAtaHsmaraNastotram.itx

Category : vishhnu, suprabhAta, krishna, nimbArkAchArya

Location : doc_vishhnu

Author : Nimbarkacharya

Latest update : January 12, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 1, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણપ્રાતઃસ્મરણસ્તોત્રમ્

પ્રાતઃ સ્મરામિ યુગકેલિરસાભિષિક્તં
 વૃન્દાવનં સુરમણીયમુદારવૃક્ષમ્ ।
સૌરીપ્રવાહવૃતમાત્મગુણપ્રકાશં
 યુગ્માઙ્ઘ્રિરેણુકણિકાઞ્ચિતસર્વસત્ત્વમ્ ॥ ૧॥

પ્રાતઃ સ્મરામિ દધિઘોષવિનીતનિદ્રં
 નિદ્રાવસાનરમણીયમુખાનુરાગમ્ ।
ઉન્નિદ્રપદ્મનયનં નવનીરદાભં
 હૃદાનવદ્યલલનાઞ્ચિતવામભાગમ્ ॥ ૨॥

પ્રાતર્ભજામિ શયનોત્થિતયુગ્મરૂપં
 સર્વેશ્વરં સુખકરં રસિકેશભૂપમ્ ।
અન્યોન્યકેલિરસચિહ્નસખીદૃગૌઘં
 સખ્યાવૃતં સુરતકામમનોહરં ચ ॥ ૩॥

પ્રાતર્ભજે સુરતસારપયોધિચિહ્નં
 ગણ્ડસ્થલેન નયનેન ચ સન્દધાનૌ ।
રત્યાદ્યશેષશુભદૌ સમુપેતકામૌ
 શ્રીરાધિકાવરપુરન્દરપુણ્યપુઞ્જૌ ॥ ૪॥

પ્રાતર્ધરામિ હૃદયેન હૃદીક્ષણીયં
 યુગ્મસ્વરૂપમનિશં સુમનોહરં ચ ।
લાવણ્યધામ લલનાભિરુપેયમાનમ્
 ઉત્થાપ્યમાનમનુમેયમશેષવેષૈઃ ॥ ૫॥

પ્રાતર્બ્રવીમિ યુગલાવપિ સોમરાજૌ
 રાધામુકુન્દપશુપાલસુતૌ વરિષ્ઠૌ ।
ગોવિન્દચન્દ્રવૃષભાનુસુતૌ વરિષ્ઠૌ
 સર્વેશ્વરૌ સ્વજનપાલનતત્પરેશૌ ॥ ૬॥

પ્રાતર્નમામિ યુગલાઙ્ઘ્રિસરોજકોશમ્
    અષ્ટાઙ્ગયુક્તવપુષા ભવદુઃખદારમ્ ।
વૃન્દાવને સુવ્યરન્તમુદારચિહ્નં
    લક્ષ્મ્યાઉરોજધૃતકુઙ્કુમરાગપુષ્ટમ્ ॥ ૭॥

પ્રાતર્નમામિ વૃષભાનુસુતાપદાબ્જં
    નેત્રાલિભિઃ પરિણુતં વ્રજસુન્દરીણામ્ ।
પ્રેમાતુરેણ હરિણા સુવિશારદેન
    શ્રીમદ્વ્રજેશતનયેન સદાભિવન્ઘમ્ ॥ ૮॥

સઞ્ચિતનીયમનુમૃત્યમભીષ્ટદોહં
    સંસારતાપશમનં ચરણં મહાર્હમ્ ।
નન્દાત્મજસ્ય સતતં મનસા ગિરા ચ
    સંસેવયામિ વપુષા પ્રણયેન રમ્યમ્ ॥ ૯॥

પ્રાતઃ સ્તવમિમં પુણ્યં પ્રાતરુત્થાય યઃ પઠેત્ ।
સર્વકાલં ક્રિયાસ્તસ્ય સફલાઃ સ્યુઃ સદા ધ્રુવાઃ ॥ ૧૦॥

ઇતિ શ્રીનિમ્બાર્કાચાર્યવિરચિતં શ્રીકૃષ્ણપ્રાતઃસ્મરણસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Krishna PrAtahsmarana Stotram*

pdf was typeset on December 1, 2022

Please send corrections to *sanskrit@cheerful.com*